7232

1. Title Vedoṁ Kā Yathārtha Svārūpa
2. Accession No. 5676
3. Folio No./Pages 38 (208p to 245p)
4. Lines 9
5. Size 34 × 12Cm.
6. Substance Paper
7. Script Devanāgarī
8. Language Sanskṛit
9. Period Not mentioned.
10. Beginning "योणमास्पां व्यती पातेदघात पूर्वं तिलोदकं अहोर्द येगज.. "
11. End "वर्णा तुल्यांतुल्य व्यसि सर्वेषामति क्राते तथैव चेति व्याघ्रोक्तेः अथाशौच सेपति उच्यते तत्र-शाबे..."
12. Colophon No
13. Illustrations No
14. Source Donation
15. Subject Veda
16. Revisor No
17. Author Not Known
18. Remarks Pages are not in order, damaged by termite, seems to be incomplete Bound.

Vedon Kā Yathartha Svarūpa.

208 to 245 p.

Language - Sanskrit, Hand Written.

Size --34 X 13 Cm.

(यौणमास्यांव्य पाते दद्यात ----
अह्वाघल्या शौच संपति)

2

वृणोतुस्मं।तुल्यवयसिसर्वेषामतिक्रातेतथैवचेतिव्याघ्रोक्तेः॥अ

वेसत्तकंसत्तकेशावंवातत्राप्युत्तरंकाय्यतपूर्वेणसमन्पन्नमधि

त्तायदातुद्वितीयादिदिनेपूत्तरंसजातीयंशावेजननंवासमका

द्धिः॥अंतराजननमरणेशेषाहोभिर्विशुध्यतीतियाज्ञवल्क्योक्तेः

र्वशौचोत्तरंतन्मध्येतपन्नेसातेतत्तरमेकत्कार्यं।श्रुद्धितलेपु

त्तादुपरिष्क्रतंस्याशौचहेतुरेवाअज्ञानंतुनाअविज्ञातेनदोषस

त्ते॥तेनाज्ञानाद्वषोत्सर्गादौकृतेपश्चादनुज्ञानेपिनावृत्तिरिति

तथा।पर्वशेषेणाशुद्धिस्यादुत्तराशौचवर्जनं।अत्रकेचित्अंतय

प्रोयावत्तस्यादनिर्दशमितिमनुपराशरादेर्दशाहग्रहणेतपूर्णाशौचएवपूर्वशेषशुद्धिः॥महाप्यस्याशौचसंपाते २५

2

वर्णानुरूपं। तुल्यवयसि सर्वेषामतिक्रान्ते तथैव चैनित्याद्योक्ते:॥ अथाशौचसंपातउच्यते। तत्र शावे शावं सूतके सूतकं। शा
वे सूतकं सूतके शावं वा। तत्राप्युत्तरं कालतः पूर्वेण सममन्यूनमधिकं वाशौचद्वयं तत्र तंत्रेणाप्यसिद्धिः। द्वयोरेककालता
त्। यदा तु द्वितीयादिदिनेषूत्तरं संजातायं शावे जननं वा समकालं न्यूनकालं वा परं स्यात् तदा पञ्चसु पक्षेषु पूर्वशेषेण शु
द्धिः। अन्तरा जन्ममरणे शेषाहोभिर्विशुध्यतीति याज्ञवल्क्योक्तेः। अंतरा इत्यर्थः। ज्ञातस्यैव जननादेर्निमित्तत्वात्। पू
र्वाशौचोत्तरं तन्मध्योत्पन्ने ज्ञाते तदुत्तरमेव कार्यं। स्मृत्यन्तरेऽप्युक्तं। पूर्वाशौचांतरुत्पन्नं समानं लघु वा निमित्तं तत्का
लादुपरिष्टात् तं स्वाशौचहेतुरेवा। अज्ञानं तु ना। अविज्ञातेन दोषस्यात् श्राद्धादिषु कथं च नेत्यस्यापि शौचसांकर्येऽपि प्रव
त्ते:। तेनाज्ञानाद्दोषो स्मार्तीदीक्षिते पश्चात्संज्ञाने पिनावृत्तिरिति। माधवोप्ययमो पि जनने जननं चेत्स्यात् मरणे मरणं
तथा। पूर्वशेषेण शुद्धिः स्यादुत्तराशौचवर्जनं। अत्र केचित् अंतर्दशाहे स्यातां तत्पुनर्मरणजन्मनी। तावत्स्यादशुचिर्वि
प्रो यावत्तत्स्यादनिर्दशमिति मनुपराशराभ्यां दशाहग्रहणात् पूर्णाशौच एव पूर्वशेषशुद्धिः। अल्पाशौचस्याशौचसंपाते

२५

संवत्सरादर्वाग्देशांतरमृतेषु पातिविष्णुरिति माधवः। इदं सपिंडानां देशांतरे स्नानं सोदकानां मेतमुक्तं। तत्र स्तत्रां बृहस्पतिः। महानद्यंतरं यत्र गिरिर्वा व्यवधायकः। वाचो यत्र भिद्यंते तद्देशांतरमुच्यते। देशांतरं वदंत्येके षष्ठियोजनमायतं। चत्वारिंशद्वदंत्यन्ये त्रिंशदन्ये तथैव च। इति। एतत्सर्वं मातापित्रोर्भिन्नविषयं। तयोस्तु पितरौ चेदिति पूर्वं पैठीनसीवाक्यास्सदापूर्णमेव दशाहादि। स्मृत्यर्थसारेपि। मातापित्रोर्मरणे दूरदेशेपि संवत्सरोर्ध्वमपि पुत्रो दशाहादिकं पूर्णमाशौचं कुर्यात्। स्त्रीपुंसयोः परस्परं सपत्नीषु चैवमिति। शुद्धितत्वादयोगोडास्तु ऊर्ध्वं संवत्सराद्यद्यपि बंधुस्त्रेष्वृयते मृतः। संवेदैकाहमेवात्र तत्र संमासी नांन तु इति देवलोक्तेः। पित्रो रब्दमध्ये त्रिरात्रमूर्ध्वमेकाहः। बंधुर्मातापितामहश्चापूर्वोक्तदशाहस्त्वलक्षणादिदेशपर इत्याहुः। ने बंधुपदस्य पित्रादिपरत्वे मानाभावादुपेक्ष्याः। सापत्नमातुस्तु दक्षः। पितृपत्न्यामपेतायां मातृवर्जं द्विजोत्तमाः। संवत्सरे व्यतीते तु त्रिरात्रमशुचिर्भवेत्। हानवर्णमातृषु सपत्नीषु चैवमिति स्मृत्यर्थसारोक्तेश्च पितुःपत्न्यां प्रमातायां मोरसे तनये तथेति ब्राह्मोक्तेरौरसे पीत्यमाहुः। षडशीतावप्येवं। एतत्सर्व

५

२५

त्रिभतउत्क्रांते दिमादिविरोधाच्च। स्मृत्यर्थसारेपि। जनने मरणे वा प्रथमदिनादूर्ध्वं ज्ञाते पुत्रादीनां विशेषेणैव शुद्धिरिति। षडशीतावप्यराके चैवं। दशाहादूर्ध्वं ज्ञाते तु वृद्धवसिष्ठः। मासत्रये त्रिरात्रं स्यात्षण्मासे पक्षिणी तथा। अहस्तु नवमादर्वागूर्ध्वं स्नानेन शुध्यति। जनने तु निष्क्रांताशौचं नास्त्येवावाशुद्धिः। प्रसवाशौचे व्यतीते शुद्दिनेषु पातिदेवलोक्तेः। पितुस्नानं तत्रापि भवत्येव। निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च। सवासा जलमाप्लुत्य शुद्धो भवति मानव इति मनूक्तेः। तच्चातिक्रांताशौचं दशाहादि जातसौचविषयं। ननूपनीतादि निमित्तत्रिरात्रादौ। उपनीते तु विप्रे तस्मिन्नेवातिकालजननमिति व्याघ्रोक्तेः। निर्दशं ज्ञातिमरणं श्रुतिक्रांते दशाहे द्वितिमनूक्तेश्च। माधवीये देवलस्तु त्रिपक्षत्रिपक्षिशत्रं स्यात्षण्मासे पक्षिणी तनः। परमेकाहमावर्षादूर्ध्वं स्नानेन विशुध्यतीति। तत्रापदनापद्विषयत्वेन व्यवस्था इदं चैकदेशे देशांतरे तु स्नानमात्रं देशांतरं मृतं श्रुत्वा क्लीबे वैखानसे यतौ। मृते स्नानेन शुध्यंति गर्भस्रावे च गोत्रिण इति पराशरोक्तेरिति विज्ञानेश्वरः। स्नानं वत्सरांते। अर्वाक् त्रिपक्षात्त्रिनिशं षण्मासाच्च दिवानिशं। अहः

का: शिष्यश्चैकत्रवासिनः। स्वामितुल्येन शौचेन शुध्यंति मृतसूतके इति बृहस्पतिस्मृतेः। दासश्चात्र गृहजातस्त
था क्रीतो लब्धो दायादुपागतः। अन्नाकालभृतस्तद्वदाहितः स्वामिना च यः। मोक्षितो महतश्चर्णाद्युद्धप्राप्तः पणे जि
तः। तवाहमित्युपगतः प्रव्रज्यावसितः कृतः। भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः। विक्रेता चात्मनः शास्त्रे दासाः पंच
दश स्मृताः इति नारदोक्तेषु गर्भमित्रसमैर्विना ज्ञेयः। वडवा दासी। तयाहृतः। तामुद्वाह्य दासो जातो इत्यर्थः। अंतेवा
सिनि तेनैवोक्तं: स्वशिल्पमिच्छन्नाहर्तुं बांधवानामनुज्ञया। आचार्यस्य वसेदंते कृत्वा कालं सुनिश्चितं। आचार्यः
शिष्ये पंचंस्वगृहे दत्तभोजनमिति। शिष्यस्तत्तुल्यो विद्यार्थी। दासादेः स्वामितत्सपिंडमरणे तु विष्णुः। पत्नीनां दासानामा
नुलोम्येन स्वामितुल्यमाशौचं मृते स्वामिन्यात्मीयमिति। प्रतिलोमे दासानामाशौचाभावः। वर्णानामानुलोम्येन स्वस्वन
प्रतिलोमतः इति याज्ञवल्क्योक्तेः। आपराह्णे जनने मरणे वा रात्रिं रात्रिभागां कृत्वा आद्यभागद्वये चेत् पूर्वदिनं। अंते तत्त
रमिति मिताक्षरायां। यत्तु प्राणाधीनत्वात् शास्त्रस्यार्धोदयात् पूर्वदिनमित्युक्तं तद्देशाचारतो व्यवस्था। सर्वत्राशौचमादिता

ग्नेर्दाहमारभ्य तद्दिनस्य मरणमारभ्य ज्ञेयं। अनग्निमतस्तु अक्रांते राशौचादि द्विजातिषु। दाहादग्निमतो विद्याद्विदेशस्थे
मृते सतीति पैठीनसिस्मृतेः। साग्निराहिताग्निः। आहिताग्निश्चेत्प्रवसन् म्रियेत पुनः संस्कारं कृत्वा शववदाशौचमि
ति वासिष्ठे विशेषोक्तेः। दाहादेव तु कर्मव्यं यस्य वैतानिको विधिरिति ब्राह्मं च। यत्तु धर्मे स्वामिनारामांडरेणोक्तं। आ
हिताग्नेरपि मरणाद्येव दशरात्रं दशाहं श्राद्धमाशौचमिति मरणनिमित्तत्वात्तस्य यत्तु दाहादेवाशौचमुक्तं तत्संस्का
रनिमित्ताशौचं पृथगेवातेन गृह्याग्नेः संस्कारांगत्रिरात्रं श्रौताग्नेस्तु दशरात्रं मरणनिमित्तं उभयोर्दशाहं दाहात्प्रा
गपीति। न च वचनविरोधात् पूर्वस्यैवोत्कर्षात् मुख्यकल्पनालाघवाच्च चिंत्यं। अथ अतिक्रांताशौचं। तत्राशौचमध्ये जनना
दौ ज्ञाते तच्छेषेणाशुद्धिः। विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशं। यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेदिति मनूक्तेः। अ
त्र केचिदेतत् पुत्रातिरिक्तविषयं। तेषां त्वाशौचमध्येऽपि श्रवणे पितृदाहवदशाहादि। पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि पु
त्रकः। श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेदित्यस्य सर्वापवादत्वादित्याहुः। तन्न। अज्ञातमरणस्य निमित्तत्वात्। अन

संचये विप्रैः स्नानेनैव शुचिर्भवेत्। दत्तस्य वैश्येष्वेवं। अदंतु सवपातप्राक् विप्रस्य त्रिरात्रं। शूद्रेत्वेवं स्पर्शोर्द्धिरात्रं। ऊ
र्ध्वं तु द्विजानामेकाहः। अदंतस्य अदंतस्यं विनासंचयात् पूर्वमेकाहः। ऊर्ध्वं संज्योतिरिरितिमाधवीयेज्ञेयं। शुद्धितत्वे पारस्क
रे तु अस्थिसंचयना दूर्ध्वं मासस्यावद्धिजातयः। दिवसेनैव शुध्यंति वाससां त्याजनेन च। असजाते दिवसेनैव अहोतं दत्त
त्रिपदैः स्पयोरिस्तुक्तं। सपिंडानां रोदननिर्हरादावदोष इत्युक्तं प्राक्। विज्ञानेश्वरस्तु मृतस्य बांधवैः सार्धं कृत्वा तु परिवेद
नं। वर्जयेत्त दहोरात्रं दानश्राद्धादिकर्म चेति पारस्करोक्तेः सर्वत्रैकरात्रमाह। अथाशौचान्नभक्षणे। विष्णुः। ब्राह्मणादीना
माशौचे यः सकृदेवान्नमश्नाति तस्य तावदाशौचं यावत्तेषामाशौचव्यपगमे प्रायश्चित्तमिति। अज्ञानेत्वंगिराः। अंतर्द
शाहे तु ज्ञानं स्यात् सूतके मृतकेपि वा। तस्याशौचं भवेत्तावद्यावदन्नं व्रजत्यधः। प्रायश्चित्तं तु मत्या विप्रस्य वर्णक्रमेणैका
हस्यहस्यंचाहस्य प्राहोवासाः दशविंशतिः षष्टिः शतं च प्राणायामाः। पंचगव्याशनं वा अभ्यासे हिरण्यं। आपदि तु प्रा
णायामः। शतं पंचशतमष्टसहस्रं गायत्रीजपश्च। मत्या दितु सवर्णाशौचे त्रिरघमर्षणं। गायत्र्यष्टसहस्रं चा दत्ति

७ ३२

याशौचे उपवासश्च। वैश्याशौचे त्रिरात्रोपवासश्च। क्षत्रियाशौचे उपवासश्च। शूद्राशौचे कृच्छ्रः। दत्तत्रैवैश्ययोः पंचश
तमष्टशतं गायत्रीजपश्च मेषु। शूद्रस्य सर्वत्र स्नानं। मत्याअनापदि विप्रस्य वर्णेषु सांतपनकृच्छ्रमहासांतपनं चांद्रा
यणं। अभ्यासे तु मासिकद्वैमासिकत्रैमासिकषण्मासिकानीत्यादि माधवीयादौ ज्ञेयं। अथ दासस्यास्तदासस्तु यत्र स्व
स्वसपिंडमृतौ स्नानमात्रेण स्वामिकार्ये स्वरूपत्वं। मृतदासस्य अहोर्ध्वं संचयः स्वरूपो गर्भदासो भक्तदासश्च क्रीतश्चिरिति
स्मृत्यंतरोक्तेः। मृत्यकर्मकराः शूद्रा दासीदासास्तथैव च। स्नाने शारीरसंस्कारे गृहकर्मण्यदूषिताः इति शातातपोक्तेश्चा
ए तच्चान्यस्य धर्मकार्यमात्रे। अन्यत्र मासाशौचे मस्येवा। एवं दास्यामपि स्मृतिकायास्तस्या अस्वरूपत्वमपि मासमा
त्रं। दासीदासश्च सर्वो वै यस्य वर्णस्य यो भवेत्। वर्णस्य भवेच्छौचं दासीमासस्तु सूतकमित्संमिरसोक्तेः। षडशीतावपि
स्वामिशौचेन शुध्यापाः स्वरूपामासानुकर्मसु। योग्यासु मासतो दासीस्तृतिवे तत्स्वरूपतामियात्। दत्तदासादीनां स्व
सपिंडमरणादौ स्वाम्याशौचमसंख्यदिनोर्ध्वं सत्यपि मासाद्यशौचे स्वामिकार्ये स्वरूपतेतिहरदत्तः। दासांते वासिमतः

८

हेऽप्येवं तदाशौचं दृष्टार्थे द्विगुणं भवेदिति व्याघ्रोक्तेः। कौर्मेऽपि तदिति गौडाः। दाहेऽप्येवं यत्र स्नात्वा। यो सवर्णं तु मूल्येन
नीत्वा चैव दहेन्नरः। आशौचं तु भवेत्तस्य प्रेतजातिसमं नृपेति तदापदि ज्ञेयं सोदकनिर्हारे तु दशाह इति माधवः। स्व
ल्पे करणे तु शंखः। कृच्छ्रपादो सपिंडस्य प्रेतालंकरणे कृते। अज्ञानादुपवासः स्याज्ज्ञात्वा स्नानमिष्यते। धर्मार्थं अना
थस्य सवर्णनिर्हरे क्रियाकरणे च द्विजस्यानंतयज्ञफलं स्नानं प्राणायामो ग्निस्पर्श स्पर्शाति श्चेति माधवीये। अग्निदे
ष्येवं प्रेतस्पर्शे संस्कारे ब्राह्मणो नैव शुद्ध्यति। वोढा चैवाग्निदाता च सप्तः स्नात्वा विशुध्यतीति अपरार्के वृद्धपराश
रोक्तेः। मातुलत्वादिसंबंधे त्रिरात्रं। असंबंधिद्विजान्वहित्वा दहित्वा च सप्ताशौचं संबंधे त्रिरात्रमिति पैठीनसिस्म
तेः। गौतमे मिताक्षरायां च्छ्वात्रिः। सत्त्वकाद्विगुणं शावशावाद्विगुणमात्तौ। आर्त्तेभ्यो द्विगुणास्तितस्ततो पित्रावद
हके। अत्र पूर्वेणानोत्तरनिवृत्तिरित्यर्थः। विष्णुः। मृतं द्विजं न शूद्रेणाहारयेन्न शूद्रं द्विजेनादेवलः। ब्रह्मचारी न
वीतनाववाहादिकक्रियां। यदि कुर्याच्चरेत्कृच्छ्रं पुनः संस्कारमेव च। याज्ञवल्क्यः। आचार्यपित्रुपाध्यायान्निर्हृत्या

पि व्रती व्रती। अनुगमने तु सापिंडे न दोषः। विहितं हि सपिंडानां प्रेतनिर्हरणादिकं। तेषां करोति यः कश्चित्तस्याधि
कं न विद्यते इति देवलोक्तेः। दोषस्त्वसपिंडस्य तत्रानाथक्रियां विनेति हारीतोक्तेश्च समोत्कृष्टवर्णे तु माधवी
ये देवलः। अनुगम्य शवं बुद्ध्या स्नात्वा स्पृष्ट्वा हुताशनं। सर्पिः प्राश्य पुनः स्नात्वा प्राणायामैर्विशुध्यति। हीनवर्णे तु
क्षत्रिये काहः। वैश्ये पक्षिणी। शूद्रे त्रिरात्रं क्षत्रियस्य वैश्ये काहः पक्षिणी। वैश्यस्य शूद्रे हरिति विज्ञानेश्वरः। माधवस्तु
विप्रस्य वैश्ये त्र्यहः। क्षत्रियस्य शूद्रे प्येवं। असमत्प्राग्वत्। स्नानाग्निस्पर्शघृताशनानि सर्वत्रेत्याह। हीनवर्णस्य दाहे
ध्वं दोह्यं कं। कामाल्लोभाद्भयान्मोहात्कृत्वा तज्जातितां व्रजेत्। मनुः। ब्राह्मणानां याजनं कृत्वा परेषामंत्यकर्म च। अभिचार
महीनं च त्रिभिः कृच्छ्रैर्व्यपोहति। परेषां सवर्णानां। हीनेषु तु द्विगुणं त्रैगुण्यं वा तु गुण्यं कल्प्यं। अपरोदने समोत्तम
वर्णयोः संचयनात्पूर्वं सचैलस्नानं मध्ये माचमनं। हीनवर्णेषु तु संचयनात्प्राक् सचैलम् ऊर्ध्वं स्नानमात्रं विप्रस्य क्षत्रि
वैश्यविषये तु ब्राह्मे। अस्थिसंचयने विप्रो रोति चेत्क्षत्रवैश्ययोः। नदीं स्नात्वा सचैलस्तु द्वितीयेऽह्नि शुध्यति। कृते तु

च्छिन्नेऽशोकाहादि पक्षे द्व्य मुक्तं। तत्र संनिधिविशेषमेत्यादिकृ तान्यवस्था। त्रिंशच्छ्लोकांवान प्रस्थेयतो चोपरमतिकुल
जेपंडके चाप्तवः स्यायोषि ह्रो विप्रगु ण्यैमतवतितु दिनंयुद्ध विघ्ने च सद्यः अत्र मलमारेकस्य षं। युद्धमृ धर्ममतस्यस्ना
नांउघतेराहवे शास्त्रैः क्षत्रधर्म हतस्य च। सद्यः संतिष्ठते यज्ञस्तथाशौचमिति स्थितिरिति मन्वुक्तेः यज्ञोतकर्मसर्वंत
दैवे प्यर्थः। यस्त्वभारते राजधर्मादिषु। आयुधो घोहि हतः शूरः स्वर्गलोकमहीयते। न स्नानमुदकं तस्य न स्नानं नाप्य
शौचकीमति श्राद्धादिनिषिद्धः सपुत्राद्यभावपरः। अत एव तत्र कर्णादीनां श्राद्ध मुक्तं। अन्ये तु दशपिंडनिषेधामा
हयेतिवत्। यत्तु पराशरः। आहवेपि हतानां च एकरात्रमाशौचकमितित्यक्त्वा तेनकालांतरमृते ज्ञेयं असंनिधौ
स्नानमिति माधवः। शुद्धिपत्रे अग्निपुराणे दंष्ट्रिभिः शृंगिभिर्वापि हताम्लेच्छैश्च तस्करैः। ये स्वाम्यर्थे हता यांति राजस्व
र्गेनि संशयः। सर्वेषामेव वर्णानां क्षत्रियस्य विशेषतः। यत्तु बृहस्पतिः। डिंबाहवे विद्युता च राज्ञां गोविप्रपालने। स
द्यः शौचं मृतस्याहुस्त्वन्ये हि वा न्यैमहर्षयः। तत्स्वविना परांमुख हते च त्रिरात्रं। राज्ञावध्ये हते सद्यः शौचमन्यत्र त्रिरा

13

त्रं। तत्रैव व्याघ्रः। क्षते न म्रियते यस्तु तस्याशौचं भवेद्विधा। आसप्ताहात्त्रिरात्रं स्याद्दशरात्रमतः परं। शस्त्राघातेत्र
सादूर्ध्वं यदिकश्चित् प्रमीयते। आशौचं प्राकृतं तत्र सर्ववर्णेष्वनिश्चयः। शस्त्रघाते क्षतं विनाशाबस्पर्शेतु प्रतीतः
शावस्पर्शो यथा मन्नप्रविशोयुरानक्षत्रदर्शनाद्वा शौचे वादित्यस्यायन्तु मनुः। अह्ना चैकेन रात्र्या च त्रिरात्रैरेव च त्रिभिः। श
वस्पृशो विशुध्यंति त्र्यहात्तूदकदायिन इति। अह्ना रात्र्या चेत्यहोरात्रं मुक्तं। त्रिभिस्त्रिरात्रैरिति नवरात्रमेवं दशरात्र
मित्यर्थः। तत्तद्ब्राह्मनेतद्गृहवासेनापि चजेयी। अंगिराः। आशौचं यस्य संसर्गादापतेद्गृहमेधिनः। क्रियास्तस्य न
लुप्यंते गृहाणां च न तद्भवेत्। अपनिर्हरणाच्छौचं। स्नेहेन सवर्णानिर्हरेत्तद्ब्राह्मनेत द्गृहवासेत्र्यहः॥ तद
ब्राह्मनेत द्गृहवासेत्र्यहः। गृहावासेत्वा महार्णवे काहः। प्रतिग्रहेणानिर्हरे दाहे च तज्जातामाशौचं यदि निर्हरति प्रे
तप्रलोभाक्रांतमानसः। दशाहेन द्विजः शुध्येद्द्वादशाहेन भूमिपः। मासार्धेन तु वैश्यस्तु शूद्रो मासेन शुध्यतीति कौ
र्मे। विजातीयनिर्हरेतु सवजातीयमाशौचं। अत्र मतिगरुद्विगुणा भवरक्ष्यद्देरं वर्णविरोवा प्यवरं यदि व

12

नगरे मृतो तु गृहे यस्य मृतः कश्चिदसपिंडः कथंचन। तस्याप्यशौचं विज्ञेयं त्रिरात्रं नात्र संशयः इति अंगिरसोक्तमि
ति माधवः एतेन त्रिरात्रमसपिंडेषु स्वगृहे संस्थितेषु चेति कौर्ममाख्यातं। शुद्धिर्न त्वेव हन्मनुः। श्वश्रूपतिताश्चांसा
मृताश्चेद्द्विजमंदिरे। शौचं तत्र प्रवक्ष्यामि मनुना भाषितं यथा। दशरात्रा तु शुनि मृते मासात् शूद्रे भवेच्छुचिः। द्वा
भ्यां तु पतिते गेहे मित्येवमनुरब्रवीत्। अंत्ये म्लेच्छः। अत्यंतः श्वपाक इति वाचस्पतिः। यमः। द्विजस्य मरणे वेश्म शुध्य
ति दिनत्रयात्। संवर्त्तः। गृहशुद्धिं प्रवक्ष्यामि अंतस्थः शवदूषिते। प्रोक्ष्य मृन्मयं भांडं सिद्धमन्नं तथैव च। गोम
येनोपलिप्याथ छागेन घ्रापयेद्बुधः। ब्राह्मणैर्मंत्रपूतैश्च हिरण्यकुशवारिभिः। सर्वमभ्युक्षयेद्वेश्म ततः शुध्यत्यसं
शयं। हद्धिक्षुः। ग्राममध्यगतो यावच्छवस्तिष्ठति कस्यचित्। ग्रामस्य तावदाशौचं निर्गते शुचितामियात्। गृ
हे यस्य सदो मृते पिंडं यत्तु माधवीये प्रचेतसा मानरस्त्वादिषु त्रिरात्रमुक्तं। मातृष्वसामातुलयोः श्वश्रूश्वसुरयोर्गुरोः
। मृते चर्त्विजि याज्ये च त्रिरात्रेण विशुध्यतीति गुरुराचार्यः ऋत्विक् कुलागतः। तत्स्वगृहमृतो ज्ञेयं। श्वशुरयोरन्यत्र
मृतावपि संनिधौ त्रिरात्रं। असंनिधौ पक्षिणी। देशांतरे एकरात्रं। वेदप्रमाण विष्णूक्तेरिति माधवगौडादयः। अन्यत्र तु पि
त्रोः स्वसरि तद्वत्पक्षिणीं क्षपयेन्निशामिति वृद्धमनूक्तं। यत्तु वृद्धमनुः। भागिनेयां संस्कृतायां तु भ्रातर्यपि च संस्कृते।
मित्रे जामातरि प्रेते दौहित्रे भगिनीसुते। शालके तत्सुते चैव सद्यः स्नानेन शुध्यतीति तन्मात्र दौहित्रादौ देशांतरे।
शालकस्य। जामात्रोः स्वदेशे ज्ञेयं। शालके तु स्वदेशेप्येकाहः। आचार्यपत्नी पुत्रोपाध्याय मातुल श्वशुर श्वश्रूश्वशु
र्यसदाध्यायि शिष्येषु एकरात्रमिति माधवीये विष्णूक्तेः। हरदत्तीये दश श्लोका मप्येवं। ज्ञेयं श्वशुर्यः शालकः। देशांत
रे स्नानं श्वशुरयोर्देशांतरे एकाहः। जाबालः। एकोदकानां तु त्र्यहो गोत्रजानामहः स्मृतं। सर्वत्र मस्त्वाभावे पित्रिया
कर्त्तुर्दशाहः। गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरन्। प्रेताहारैः समं तत्र दशरात्रेण शुध्यतीति मनूक्तेः शिष्यस्तु
पलक्षणं। निरन्वये सपिंडे तु मृते सति दयान्वितः। तदशौचं पुरा चीर्त्वा कुर्यात्तु पितृवत्क्रियामिति माधवीये ब्राह्मोक्तेः।
दिक्षितदासीये। सगोत्रो वा सगोत्रो वा योग्निं दद्यात्सखेनरः। सोपि कुर्यान्नवश्राद्धं शुध्येच्च दशमेहनि। यत्रैकविंशयेप

15

२३८

14

सुमित्रश्वश्वशुरभगिनीकाभागिनेयश्चयाणे मातामहांच पित्रोः स्वसरि चविरते मातुले मातुलान्याचार्ये ऽति
रे च स्वविषयनृपतौ ग्रामनाये च नष्टे शिष्योपाध्यायबंधुत्रयगुरुतनयाचार्यभार्यासगोत्रा ऽनूचानश्रोत्रियेषु
स्वगृहपरमृतौ मातुले चैकशत्रां रात्रं सब्रह्मचारिण्यपृथक्षमपिसत्स्वसंबंधेषु क्ते स्नानं वासोयुक्तं स्यादिद
मपि सकलं सर्ववर्णेषु तुल्यमिति। अत्र मातामहादौ स्वर्षादौ हित्रभागिनेययोरुपनीतयोस्त्रिरात्रं। अनुपनीत
योः पक्षिणी। संस्थिते पक्षिणी रात्रं दौहित्रे भगिनीसुते संस्कृते तु त्रिरात्रं स्यादिति धर्मो व्यवस्थितः इति वृद्धमनूक्तेः। सं
स्कृते दाहेन। तेन दाहे त्रिरात्रं नाम्पथोतिगौडः। तन्न विशेषवैयर्थ्यात्। मातुलादौ सन्निधिविदेशाभ्यां पक्षिण्येकाह
योर्व्यवस्था मनुः। त्रिरात्रमाहुराशौचमाचार्ये संस्थिते सति। तस्य पुत्रे च पत्न्यां च दिवारात्रमिति स्थितिः। श्रोत्रिये स्व
गृहे त्रिरात्रं। श्रोत्रिये तूपसंपन्ने त्रिरात्रमशुचिर्भवेदिति स्मृतेरिति माधवः। एकग्रामिणो त्वेकाहः। स्नातिदत्तबद्ध
स्य कालश्रोतस्मात्र्यजनपरे त्रिरात्रेकरात्रेते यायपमपि कर्म कुर्वत एष वाचकः। शौच भवतीति शबराचार्याः कर्म
मध्ये ऽत्विक्मुक्तं तेषां यापि कर्मण्याशौचनिषेधात्। तु नर्मेवे तज्ज्ञेयं गौडास्तु समानोदकानां त्र्यहो गो।।।

२३८

17

त्रजानामहस्मृतं। मातुलौ गुरौ मित्रे मंडलाधिपतौ तथेति जाबालोक्तेर्मातृबंधुष्वेकाहमाहुः। शिष्ये चोपनीते त्र्यहः। शि
ष्यसद्धर्म्यसब्रह्मचारिपुत्रेषु मरणे त्रिरात्रमहोरात्रमेकाह इति माधवीये बौधायनोक्तेः। अमत्र तु मनुः। मातुले पक्षिणीं रा
त्रिं शिष्यर्त्विग्बांधवेषु चेति। बंधुत्रयं चात्मपितृष्वसृमातृष्वसृमातुलपुत्राः। पितुः पितृष्वसृमातृष्वसृमातुलपुत्राश्चे
ति विज्ञानेश्वरः। अत्र पक्षिणी। पितृष्वस्रादिकं मातामहानां त्वेकाहः। तद्बंधुवर्गस्यैकेनेति। पूर्वोक्तब्रह्मात्। यत्तु षड
शीत्यां। एवं पित्रोर्भगिन्योर्ये ये पितामहयोस्तथा। प्रपितामहयोश्चैव भगिन्योस्तत्प्रजास्त्रयः। मातुलाः स्वस्य पित्रोश्च पञ्च
श्चैषां प्रजास्त्रयः। जीवः श्चेति सर्वेषु पक्षिणी स्यात् त्र्यहं। एवं श्वशुरजामातृदौहित्रविपदि स्मृतं। यत्तु यमः। जामातरि
मृते श्वशुरक्षितिस्त्रिरात्रेणोभयोः स्मृता। पक्षिणी श्यालकानां स्यादिति स्वातातपोऽब्रवीत् निर्मूलत्वान्मिताक्षरविरो
धाच्च पेक्ष्यं। मदनपारिजाते विष्णुः। असपिंडस्ववेश्मनि मृते एकरात्रं। अत्र हरदत्तोक्तं। शये चेत् पापस्य बस्त्रैन्तः शवेग्रा
मे धेनुः। शातादवीगन्नमभोज्यं दीपमुदकुंभं वोपनिधाय तु भुंजीता यदि समानवंशेन गृहमेवंस्मृतिकायामित्याह। प्रधा

16

स्त्रीषु नाशौचं पितृपक्षे। ततः प्रसवमरणे चेत् पितृगृहे स्यातां तदैकरात्रं त्रिरात्रं चेति। प्रसवे एकरात्रं मरणे त्रिरा
त्रमिति विज्ञानेश्वरापरार्कौ। माधवस्तु प्रसवेपि त्रिरात्रं पित्रोः। एकरात्रं भ्रात्रादिबंधुवर्गस्य। दत्ता नारी पितुर्गेहे
प्रसूयेताथ म्रियेत वा। तद्बंधुवर्गस्त्वेकेन शुचिस्तज्जनकस्त्रिभिरिति ब्राह्मोक्तेरित्याह। यत्तु कश्चिदाह। पक्षपदे
न भ्रातरो गृह्यंते। वाक्यांतरेण भगिनीमृतौ त्रिरात्रोक्तेरिति। तच्चिंत्यं। तदभावादेतद्विरोधाच्च। भ्रातुः प्रसवे एकाहः मृ
तौ त्रिरात्रमिति केचित्। युक्तं तु पक्षिणी। परस्परमितो भ्रातृभगिन्योः पक्षिणी भवेदिति ब्राह्मात्। भ्रातृभिन्नानाम
काहः वैजीके। इतरेषां यथाविधीति वक्ष्यमाणवचनाच्च। यत्तु प्रधानत्वेन मृतौ पित्रोः पूर्णा भ्रातुस्त्र्यह इति क
श्चित् तन्निर्मूलत्वान्नाशौचं पितृपक्षे इत्येतद्विरोधाच्चा। तः दत्ता नारी पितुर्गेहे प्रधाने स्यात् पतेः पदात् त्रिपतेवात
दातव्याः पिता शुध्येत् त्रिभिर्दिनैरिति कल्पतरौ शुद्धितत्वे चापत्नीगृहे प्रसवे तु पित्रादीनामशौचं नास्ति मृतौ
पित्रस्त्रिरात्रमस्येवं प्रत्ता। प्रत्तासु योषित्स्वसंस्कृता। संस्कृतासु च मातापित्रोस्त्रिरात्रं स्यादितरेषां यथाविधिः
अजातदंतासु पित्रोरेकरात्रमिति माधवीये शंखवचनात्। भ्ज्जिनस्मृतेः वैजिकादभिसंबंधादितु के स्यादसम्लपयेसा

स्त्र्यवमाधवस्त्र्य। अतिवेति जातदंतापरा दंतोत्पत्तेः प्रागेकरात्रं पित्रोः। सप्पस्त्र्य पीठकं मायां प्रोढायां वासरा ध्ववि:
प्रदत्तायां त्रिरात्रेण दत्तायां पक्षिणी भवेदिति पुलस्त्योक्तेरन्यत्रकं स्यान्मृतौ पित्रोः पक्षिणी स्यादहा षडशीतावपि। पित्त
गृहादत्ता अन्यत्र यदि पुत्री प्रमीयते। पक्षिणी पित्रोस्यान्नाम्येषामिति तिनिश्चयपद्वति। ग्रामांतरे त्र्यहमिति स्मृत्यर्थसारे। भ्रा
तुस्तु प्रदत्तायाः स्वसुर्योभगिनीत्वं मातुलानीत्वं मातुलानीत्वं मातुलयोः पित्रोः स्वरिरतश्वपत्नीणां श्वयपेत्रिरात्रमिति र
द्रवृहस्पतिस्मृतेः। शुद्धितत्वे कौर्म्ये। अदत्तास्त्रोदरे सपघ्राचौडादेकरात्रकं व्रतदाना त्रिरात्रं स्याद्दशरात्रमतः परं पि
त्रोर्मृस्त्रीणां त्रिरात्रं पित्रोरु परमे स्त्रीणामूढानां तु कथं भवेत्। त्रिरात्रेणैव शुद्धिः स्यादित्याह भगवान् यमः। इति माध
वीये नंदेः। इदं दत्तादत्तः। ऊर्ध्वं तु पक्षिणी भ्रातुर्भगिनी गृहे तस्याः वातद्रूहे मृतौ त्रिरात्रमन्यत्र तु पक्षिणीतिषड
शीतौ। वृद्धकं ब्राह्मणेपि परस्परं मृतौ भ्रातृभगिन्योः पक्षिणी भवेत्। मातुलानां शौचवत् पुत्र्यापि चर्व्याशौचमिष्यत इति। त्रिंशत्स्त्र
यानिर्मूलत्वात्। पितृव्यस्त्र्यान मातृमाह। त्रिंशच्छ्लोक्यां। प्रेते श्वाचार्यमातामहदुहितृसुतश्रोत्रियर्त्विक्सयाज्यस्त्र्यापे
षु त्रिरात्रं दिवसममथु विः सो दक्ष लमय वा पक्षिणी पाशौच मृत्ति के दुहितृसुत सहाध्यापि बंधुत्रयां तेवासि शिष्य श्रु सुमित्र

ब्राह्मणस्य त्विति प्रचेतसोक्तेस्त्र्यहैकाहाशौचेपि च तुल्य एवागस्पर्श इति। तन्नादेवलादिवचनादशाह इयंते
येतु वर्णसंकरजा मूर्धावसिक्ताद्यास्तेषामाशौचविशेषः कलौ नोपयुक्त इति नोच्यते। प्रतिलोमजानां नाशे मिदि
कर्षणार्थं तु स्नानमात्रमिति विज्ञानेश्वरः। माधवस्तु शौचाशौचे प्रकुर्वीरन् शूद्रवद्वर्णसंकरा इति ब्राह्मोक्तेः शूद्रव
दाह इत्याह। स्वतात्प्येवं। दत्तक्रीतकृत्रिमादिपुत्रेषु अहो नवर्णगासु स्त्रीषु च सपिंडत्वेपि प्रसवे मरणे च पूर्वापरपित्रोर्म
र्ध्ये त्रिरात्रमेवानदशाहादि। अनौरसेषु पुत्रेषु जातेषु च मृतेषु चापरपूर्वासु भार्यासु पुत्रेषु कृतवेषु चेति त्रिरा
त्रानुवृत्तौ विज्ञानेश्वरः। सपिंडानां त्वेकाहः। परपूर्वासु भार्यासु पुत्रेषु कृतेषु चामन्वे पित्रोस्त्रिरात्रं स्यादेकाहस्तु सपिंड
न इति माधवीये हारीतोक्तेः। सूतके मृतके चैव त्रिरात्रं परपूर्वयोः। एकाहस्तु सपिंडानां त्रिरात्रं यत्र वै पितुरिति सरोमु
क्तेश्चायं च। अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च। परपूर्वासु च स्त्रीषु त्रिरात्राच्छुद्धिरिष्यते। परपूर्वा पुनर्भूः। इदं स
वर्णासु। हीनवर्णासु तु त्र्यहः स्वस्मिन्निवितो परपूर्वासु भार्यासु पुत्रेषु कृतकेषु च। नान धायोमवे प्रसूतनाशौचं नोदक त्रि

[illegible] आशौचं त्रिरात्रं स्यात् सम्भवतोषु निःष्पतौ। यत्तु षडशीतौ। अन्यपूर्वा विकृतासु जातासु [illegible] दनाच्छुद्धिरिष्य
ते तासु वानन्यपूर्वासु पंचाहो मिविशुध्यतीति तत्र पंचाहे मिलनं चिंत्यं। यत्तु याज्ञवल्क्यः। अनौरसेषु पुत्रेषु [illegible]
गतासु चेत्येकाहमाह। तदसन्निधौ ज्ञेयं। यदा पितुरेकाहस्तदा सपिंडानां स्नानं। अन्यास्त्रितेषु हारेषु परपत्नीसुतेषु चागो।
त्रिणः स्नानं शुद्धा सुत्रिरात्रेणैव तत्रापि तेति प्रज्ञा पतुके [illegible] ते तिनो दुरुपलक्षणं। तथोपक्रमात्। यत्तु दत्तके पालकप्र
तियोगिक पुत्रत्वात् पूर्वपितुर्न त्रिरात्रं पूर्वसंबंधनिवृत्त्या न दशाहादाति कश्चित् तत् [illegible] जनकेपि बीजिकादमि संबंधा
दनु संध्यादायं त्र्यह मिति वाचनिकाशौचनिवार्यत्वात्। पितृमरणे पि दत्तकादीनां त्रिरात्राशुद्धि तत्त्वे ब्राह्मे। दत्त कृतस्वयं
दत्तः कृत्रिमः क्रीत एव चेत्युपक्रम्य सूतके मृतके चैव त्र्यहाशौचस्य भा[illegible]नः। हत्युक्तेः। दत्तकस्य पुत्रपौत्राणां तु ज[illegible]न
रणेवा सपिंडानामेकाहः। बीजिनश्चेति गोतमेन साप्तपौरुषं सा[illegible]के। सपिंडानां चैकाहास्योक्तत्वात्। सपिंडे तु
पुत्रीकृते दशाह एवात्राकांक्षाभावात्। पूर्वापरभर्तृसुतस्य [illegible] योस्त्र्यह माधवीये मरीचिः। मातुरैकाहि
पैत्रको भ्रातरावन्यगोत्रजो। एकाहं सूतके तत्र त्रिरात्रं मृतके [illegible] योरिति दिक्। ऊढकन्यानां तु विज्ञानेश्वराह। संस्कृते.

शाहाश्रहएकाहेः शुध्यंत्यपिहिनिर्गुणाइति। द्विजादंताः। इदंप्रतीत्युक्तेः। पंचाद्दोपनीतपरमिति। तदेतंनाङ्ग्यंते

वह्नः। यानितु पराशरः। एकाहाद्ब्राह्मणःशुध्येत्योग्निवेदसमन्वितः। त्र्यहात्केवलवेदस्तु द्विहीनोदशभिर्दि

नैः। केवलवेदः केवलश्रोताग्नेरप्युपलक्षणं। अयंशंकोचोहोमाध्ययनपरएव। नत्वसध्यादाविति हारलति

तायां। अंगिराः। सर्वेषामेववर्णानांसूतकेमृतकेतथा। दशाहाछुद्धिरेतेषामितिशातातपोब्रवीत्। देवलः।

आशुध्यंदशरात्रंतु सर्वेषामपरेविदुः। निधनेप्रसवेचैवपश्यंतःकर्मणःक्षयं। असंतोतत्कष्टस्यकर्महानोप।

डावंतोविप्रपरिचर्यापरंष्वइ दशरात्रमितिहारलतायां। दक्षः। सद्यःशौचंतथैकाहस्त्र्यहश्चतुरस्तथा। षट्दश

द्वादशाहश्चपक्षोमासस्तथैवच। मरणांतांतथाचान्यदृशापक्षास्तुसूतके। मिताक्षरायांस्मरंतरे। चतुर्थेदशरा

त्रंस्यात्षण्निशाःपुंसिपंचमे। षष्ठेचतुरहाछुद्धिःसप्तमेत्वहरेवतु इत्यादीनितान्यायदनायजुणाव दगुणाव

द्विषयाणिदेशाचारभेदाद्वानेयानि। सद्यःशौचेनिषण्णांताःपक्षाःयायावदादिपराः। अत्रमरणांतुंजनना

दीनामित्ताभिप्रेतः। अस्वस्थेलोकवाह्यवृत्तिमधुपर्केगवालंभवत्। शिष्टविगर्हितान्नादक्तेचानानितिविज्ञानेश्वरः।

अस्नात्वाचाप्यहुत्वाचअदत्वाअस्तथाद्विजः। एवंविधस्यविप्रस्यसर्वदासूतकंभवेदितिदक्षोक्तः। अस्यपूर्वा

यस्यगेहेभार्यास्यात्तस्यनित्यशःआशौचंसर्वकार्येषुदेहेभवतिसर्वदेतिब्राह्मणादिव, गाघवस्तेयपरार्कमदनं

पारिजातादयः। माधवस्तु। वृत्तस्वाध्यायसापेक्षमघसंकोचनंतथेतिकलिवर्ज्येपूर्वोक्तेः। दशाहएवविप्रस्यस

पिंडमरणेसति। कल्पांतसराणिकुर्वाणःकलौभतिकिल्विषीतिहारलतोक्तेः। विरुद्धनाशौचपक्षाः। युगांतरविषयाः

मरणांतादिपक्षास्तुनिंदार्थवादाः। अमथानामधारकविप्रदशाहंसूतकीभवेदितिविरोधस्यादित्याहाय। तुदेवलः। द

शाहादित्रिभागेनकृतेसंचयनेक्रमात्। अंगस्पर्शनमिछंतिवर्णानांतत्वदर्शिनइति पूर्णशौचेस्पृश्यतामाहह।

यच्चानुपनीतातिक्रांताशौचेत्रिरात्रादौतेनैवोक्तं। स्वाशौचकालाद्विज्ञेयंस्पर्शनंतत्रिभागतइतितदपियुग

अस्थिसंचयनादूर्ध्वमंगस्पर्शनमेवचेतिमाधवीयेकलौतंनिषेधात्पत्युहारलतायां। चतुर्थेहनिकर्त्तव्य

तके ..या।।

23 22 २३५

स्वेनतपो नरूतयापन्नेरितिशुद्धिविवेकः। यस्तु पुत्राणां वेदानध्यापयन्तिं विदधातितत्रा दृश्यास्वलायतः। द्वादशरात्रं महागुरुषुदानाध्ययनेवर्जयेरन्निति। अत्रयावदुक्तनिषेधोवाऽस्पृश्यत्वमात्रंवा। नतुकर्मानधिकारः। एकादशाहं तेवैश्वदेवोक्तेः। एकादशाहिकमुक्तातत्रयंते विधीयत इति। शुद्धितत्त्वेतुत्रेयः। पुरुस्त्रातिगुरवोभवंतिमाता पितृ

चार्यश्चेतिविष्णूक्तेः। पित्रादयोमहागुरवः। भर्त्ता पुंक्तो रामायणे। पतिर्वधुगतिर्भर्त्तादैवतंगुरुरेवचा। स्त्रातातपः। पतिरेकोगुरुस्त्रीणांसर्वस्याभ्यागतोगुरुः। एकपदमहानांपिन्हमान्हनिषेधार्थं। सोदकानांत्रिरात्रंत्र्यहात्दकदापिन

इतिमनूक्तेः। अग्निपुराणे। सपिंडतातुपुरुषेसप्तमेविनिवर्त्तते। समानोदकभावस्तुनिवर्त्तेतचतुर्दशे। जन्मनामस्मृ

तेर्वैके तत्परंगोत्रमुच्यते। बृहस्पतिः। दशाहेनसपिंडास्तुशुध्यंतिप्रेतसूतके। त्रिरात्रेणसकुल्यास्तुस्नात्वाशुध्यंति

गोत्रजाः। स्त्रीष्वदयोस्तुविवाहोर्ध्वंजाम्राशौचंवैवाहिकोविधिस्त्रीणामोपनायनिकःस्मृतइत्युक्तेः। दत्तानांतुभर्तृ

रेवहि। स्वजात्युक्तमशौचंस्यान्मृतकेजातकेतथेति माधवीयेत्रात्वाच्चाष्टदस्पविवाहाभावेपिषोडशवर्षोर्ध्वमा

यैविचारणेति अपरार्केऽयंस्वोक्तेः। निर्णयामृतमदनपारिजातादौतम्ययोक्तं। हारीतः। आमौंजीबंधनाद्विप्रःक्ष

त्रियस्यधनुर्ग्रहात्। आप्रतोदग्रहाद्वैश्यः शूद्रोवस्त्रद्वयग्रहात्। धनुःप्रतोदवक्ष्मेदोद्वादशेवस्त्रद्वयमिति। मेधा

तिथिस्तुत्रिरात्रमात्रतादेशादित्यत्रव्रतंकालोपलक्षणार्थं। सचकालःस्वस्वीयः। सर्वेषांचाष्टमवर्षरूपः। तेनच

तुर्णामपिवर्णानामुपनयनाभावेप्यष्टमादूर्ध्वंपूर्णमेवाशौचं। तत्रापिप्रागमाच्छिरावःप्रोक्ताइतिस्मृतंतदूर्ध्व

र्ध्वंसंपूर्णमर्वाक्त्रिरात्रं। येप्याषोडशान्दवेष्वायइत्याहुस्तेषामप्यणमादूर्ध्वंमहेमासएवाऊर्ध्वमष्टवर्षेभ्यःशुद्धि

स्यादस्यमासिकोतिवचनादिमाह। हारलतासुद्धितत्त्वादिगौडग्रंथेष्वप्युक्तं। अनुपनीतोविप्रइत्युक्तं। म्रियतेय

त्रस्यादशौचंत्र्यहमेवहि। द्विजन्मनामयंकालस्त्रयाणांतुषडब्दिक इत्यादिपुराणोक्तेरुपनयनंकालोपलक्षणं।

षडब्दंमासमात्रयाधिकपरांगर्भाष्टमेष्टमेवाब्देइत्युक्तेः। यत्तुगालवः। व्रतचूडाद्विजानांचप्रतीतिषुयथाक्रमांद

प्राजीवते बालस्तत्तच्छिशुरापदीयते। तथा॥ अग्निनिक्षेपणं बाले आवर्षद्वयमाशिखं ततः परं खनं गंगे श्रेष्ठे देहदाहो यथा
विधिः॥ आचूडे पूर्धं खननं निवसर्षमावर्षद्वयमिति। प्रागपि कृतचूडस्य निवर्त्यं र्षमाशिखमिति। तथा। चूडाकर्मणि
संजाते विपत्तिस्तु यदा भवेत्। सूतकांते प्रकर्तव्यं वषसोमसजनं तथा। तत्र दाह [illegible] कर्त्तव्य उदकं तत्रं निश्चितं। आद्या
निषोडशापि स्युः सपिंडीकरणं विना। इदं पंचवर्षोत्तरं। जन्मतः पंचवर्षाणि शुद्धे दत्तमसंस्कृतं। पंचवर्षाधिके बाले वि
पत्तिर्यदि जायते। वृषोत्सर्गादिकं कर्म कर्त्तव्यं मुदकं ततः॥ अहन्यहनि संप्राप्ते कुर्याच्छ्राद्धानि षोडश। पायसेन गुडे
नैव पिंडं दद्याद्यथाक्रमं। उदकुंभदानं च पददानानि यानि च दापदानादि यत्किंचित्पंचवर्षाधिके सदा। कर्त्तव्यं तत्र ख
श्रेष्ठव्रतावीक् प्रेतत्वमये। स्वाहाकारेणैव कार्याण्येकोद्दिष्टानि षोडश। सञ्जुदर्भोल्लिलेः श्रुक्तेः प्राचीनावीतिना तुषे
ति। तत्रैवोक्तेः॥ अत्र मूलं विंत्या वार्षिकादि तु न भवत्येव। सपिंडनाभावे पितृत्वायोगात्। दिवोदासीयोऽत्र व्रतेनिधमं
प्राप्नैयते। इति। स्वापांतत्वाहात् प्रागुदकपिंडदानविधेः स्वः (क्रो) एणां चैके प्रत्तानामिति गोतमोक्तेः॥ स्त्रीणां त्र्यस्त
[illegible] विधिः।

धर्मोऽश्वतिवचनांतत् चूडेष्वेवं एतद्व्योनिमित्तानुशूद्रमेव च एसमा तुल्यवयसि सर्वेषामतिक्रांते तथैव चतिव्या
घ्रपादोक्तेः॥ यानि तु। निवृत्तचूडके विप्रे त्रिरात्राच्छुद्धिरिष्यते। निवृत्ते क्षत्रिये षोभ्यैवैश्ये नवमिरूच्यते। शूद्रे त्रिवर्ष
न्यूने तु मृते शुद्धिस्तु पंचभिः॥ अत ऊर्ध्वं मृते शूद्रे द्वादशाहो विधीयते। षड्वर्षांतमतीते तु शूद्रे मासमशौचकं मि
तांगिरसादीनि। तानि निःशिष्टविगानान्नांदशत्वानीति विज्ञानेश्वरमदनपारिजातादयः। तेनैतद्दशाघ्ररणाव
वस्थाप्रागुक्ता हे येवा तुल्यं वयसि सर्वेषामिति दाक्षिणात्यपरा अन्ये देशकौमौका व्यवस्थेति शुद्धितत्वे। अथाजाता
शौचं तत्र द्विजपुंसामुपनयनोर्ध्वं प्रवर्त्तते। त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परं। तत्र स्पष्टाद्दशाहानि विशः पं
च दशैव तु। त्रिंशदहानि शूद्रस्य तदर्धं न्यायवर्तिन इति याज्ञवल्क्योक्तेः॥ यत्तु स एव। त्रिरात्रं दशरात्रं वा शावमाशौच
मिष्यते इत्याह। तत्र दशाहे त्रिरात्रमस्पृश्यत्वं। एकदिनोत्पन्ने आशौचद्वये दशाहमस्पृश्यत्वं मरणं यदि तुल्यं स्या
द्धमरणे न कथंचनास्पृश्यं तु भवेज्ज्ञातेः सर्वमेव सबांधवमित्यंगिरसोक्तेः॥ दशाहाशौचपरत्वे दशरात्रमतः परमि

27

233

26

ष्णां बांधवैरुदकक्रियाजातदंतस्य वा कुर्युर्नाम्नि वापि कृते सतीति मनूक्तेः॥ उदकक्रियासहाचर्याद्दाहोपलक्षणं।
खनने तु नाप्यदोर्ध्वदैहिकं। ऊनद्विवर्षं निखनेन्न कुर्यादुदकं ततः इति याज्ञवल्क्योक्तेः॥ उदकमंत्रकर्मपरमिति अपरा
र्कः॥ यमः॥ ऊनद्विवार्षिकं प्रेतं घृताक्तं निखनेद्भुवि। यमगाथां गायमानो यमसूक्तमनुस्मरन्॥ साधवीये ब्राह्मेपि। स्त्री
णां तु पतितो गर्भः सद्योजातो मृतोपि वा। अजातदंतो मासैर्वा मृतः षड्भिर्गतैर्बहिः॥ वस्त्राद्यैर्भूषितं कृत्वा निक्षिपे
त्तं तु काष्ठवत्। खनित्वा शनकैर्भूमौ सद्यः शौचं विधीयते। अलंकरणमपि वदंते। कृतचूडस्य तु त्रिवर्षात्प्राग्
र्ध्वं वाग्न्युदकदानं नियतं। यन्मनुवसिष्ठः॥ ऊनद्विवर्षे प्रेते गर्भे पतने वा सपिंडानां त्रिरात्रमिति। तत्र प्रथमाब्दचूडापरं।
वर्षत्रयादूर्ध्वमकृतचूडस्यापि नियतं। वर्षत्रयोर्ध्वं उपनयनात्पूर्वं चेत् स्त्रीमग्न्युदकदानं तूष्णीमेवोदकं कुर्यान्न
स्त्रीसंस्कारमेवं चेति पूर्वोक्तगोत्राद्विस्मृतेः॥ पिंडदानमपि कार्यं। असंस्कृतानां भूमौ पिंडं दानं दद्यात्। संस्कृतानां
कुशेष्विति प्रचेतसोक्तेः॥ उदकदानं सपिंडैः कृतचूडस्येति गौतमोक्तेः॥ उदकग्रहणमौर्ध्वदैहिकपरमिति हरदत्तः॥

29

332

दन्ताग्रद्विसराद्वा कृपणः ... मरणासति। सापिंडाकृत... स्यादकृद्विष्टान्निकारयेदिति। हरदत्तश्च तदेव स्पष्टमाह मरणाव
रपि प्रेतपिंडं बहिर्दद्याद्दर्भमंत्रविवर्जितमिति। एतदनुपनीतपरमिति विज्ञानेश्वराः। अत्र चूडैव पूर्वावधिः पूर्वं वा
केषुतग्रहणात्। उदकग्रहणस्योपलक्षणत्वाद्दाहः पूर्वावधिरिति केचित्। द्वादशाब्दसरादित्यनुपनीतद्विजान् स्मृत्वा
विषयां अहाशौचे पिंडदानविधिमाह पारस्करः प्रथमे दिवसे देयाः त्रयः पिंडाः समाहितैः। द्वितीये चतुरो दद्याद्दस्थि
संचयनं तथा। त्रींस्तु दद्यात्तृतीये ह्नि वस्त्रादि क्षालयेत्ततः इति। अत्र देवयाज्ञिकनिबंधे विशेषः। निरउद्दंतजनना
द्वालस्याद्यावदाग्निः॥ कथ्यते सर्वशास्त्रेषु कुमारो मौंजीबंधनात्। आपंचवर्षात्कौमारो। पौगंडो नवहायनः॥ त
था गर्भे न वै क्रिया नास्ति दुग्धं देयं त्रिशोभते। परं च पायसक्षीरं दद्याद्बालविपत्तितः। एकादशद्वादशाहे वृषोत्सर्गवि
धिं विना। तथा। यत्र प्रमीयते बालस्तत्र प्रायः प्रदीयते। किं च समानवयसां संस्कृतान्नं यथाविधि। भक्ष्यभोज्यं च दा
तव्यं च सुखभक्षिका। तद्वस्त्राणि प्रदेयानि सोपानत्कानि तत्समे। कुमाराणां च बालानां योजनं वस्त्रवेष्टनं। यच्चो

28

नांतु कन्यानां तथाऽदन्तजन्मनामिति अहानुवर्त्तितोऽशौचोक्तेः। त्रिरात्रं तु भवेदूर्ध्वं षण्मासे पित्रिशौचमते इति
मत्स्यसूक्तावा। दन्तजाते ऽर्वाक् पंचाहः। यथाहांगिरसाः। अर्वाक् त्रिवर्षान्मृते तु मातुः शुद्धिस्तु पंचभिः। अत ऊर्ध्वं मृते ऽर्वा
ग्दाद्दशाहो विधीयते। षड्वर्षात्मतीतोयस्तु संस्थायते यदि। मासिकं तु भावेच्छौचमिति हांगिरसभाषितमिति
यत्तु आचूडभार्यः अर्वाक्स्थितिरात्रे खोक्तं मासाशौचं। तत्सगुणाऽर्वाक् परां निर्गुणत्वे त्वदभार्ये ऽर्वाक् त्रिवर्षोर्ध्वं द्वादशाहः।
षडब्दोर्ध्वं मासः। षडब्दात् प्रागपि कृतोपादे मासइत्याहुः। एतत्तुल्यं वयसि सर्वेषामिति विरोधाधिष्ट्य विगानान्नादर्त्तव्य
मिति विज्ञानेश्वरादयः। दाक्षिणात्यानां तथैव अमदेशे प्राप्तमिति गौडाः। एवं कन्यास्वपि। तास्वप्यजातदंतासुपि
त्रोरेकरात्रमिति माधवः। यत्तु विज्ञानेश्वरेणोक्तं ऊनद्विवर्षउभयोः सूतकं मातुरेव हीति याज्ञवल्क्योक्तेः। गर्भस्थे प्रे
तेमातर्दशाहं जात उभयोः कृतेनाम्नि सोदराणां चेति पैठीनस्योक्तेश्च पित्रे सोदराणां च दशाहमस्पृश्यत्वमिति तन्मेसनी
प्रचरति। अतएवस्मृत्यर्थसारेतेभाहृतं। कन्यासु चोलात्पूर्वकं मृते स्नानं। अचूडायां तु कन्यायां सद्यः शौचं विर

२३९

३१

धायत इत्यापस्तंबोक्तेः। इदात्रि पुरुषमध्यात् अप्रदानादूर्ध्वं त्रिपुरुषाविज्ञायते इति वसिष्ठोक्तेः। इदं वाग्दानोत्त
मरमिति गौडाः। अप्रत्तानां तथा स्त्रीणां सापिण्ड्यं साप्तपौरुषमिति वचनात्। यो ज्योत्तरं वाग्दानात्पूर्वं तत्स्वेकाहः। अ
विशेषेणवर्णानामर्वाक् संस्कारकर्मणः त्रिरात्रात्तु भवेच्छुद्धिः कन्यास्वह्नाविधीयते इत्यंगिरसा त्रिरात्रविषयेऽप्ये
होविधानात्। अतः ऽर्वाक्स्यापनयनस्थानीयविवाहात्पूर्वं त्रिरात्रं विवाहोत्कर्षेतु षोडशाब्दमध्ये त्रिरात्रमेवेत्यप
राद्याः। अर्वाक् निर्गुणोऽब्दोहोर्ध्वं पंचाहः। षडब्दोर्ध्वं विवाहाभावे द्वादशाह इति गौडाः। सगुणानां षोडशाब्दोर्ध्वं तु विवा
हाभावेपि पूर्णाशौचं वक्ष्यते। तदुत्तरं प्राग्विवाहात् दत्ते कुलेच सप्तपुरुषावधि त्रिरात्रं। अवाप्रिपूर्वं प्रत्तानुयानैवप्रति
पादिता। असंस्कृतात्सा ज्ञेया त्रिरात्रस्तु न योः स्मृतमिति मरीच्युक्तेः। रत्नाकरे शुद्धितत्त्वे त्वं च पित्रवेश्मनीया नारीर
जः पश्यस्य संस्कृता। तस्यां मृतायां नाशौचं कदाचिदपि ज्ञाप्यति। यावज्जीवमाशौचमितिवाचस्पतिमिश्राः। अथानु
पनीते किंचिदुच्यते। नाम्नः पूर्वं खननमेव। तदूर्ध्वं वर्षत्रयात्पूर्वं चोलाभावे म्युदकदानविकल्पः। नात्रिवर्षस्य कर्त्त

३०

तावत्स्वं च धारयेत्। तर्पणो त्तरं नित्यस्नानं कृत्वेमर्पः॥ अपसव्यं ततः कृत्वा सव्यं जानु च भूतले। न मनो [illegible] स्वधाकारै र्द्विता। यांतेन न तर्पयेत्। अत्र वस्वादिरूपतो त्मास्मत्पर्पसारे। वसुरूद्रादिति [illegible] न श्राद्धा र्थे तर्पयेत् पि[illegible] नात स्व कृचा नां दक्षिणेनैवा अनादेशो दक्षिणं प्रतीयादिति सूत्रात्। अत्र पत्यजलि [illegible] त्रिः। निर्वापि वीपि वसुं धा[illegible] दानवच्च [illegible] भेदात्। अवघात वेदि प्रोक्षणदो तु द्वये कत्वान्नं म[illegible] त्रिः। [illegible] याणा मत्र वत्तत्क्रियमाणानु वादित्वेन करणत्वाभावा सकृदि ष्यंति। तन्नात्र तत्र यूपद्वये स्यात्परिवीरसीति करणे [illegible] तमंत्रां तरसत्वादन्यतरेणावघ

धाना पत्यो भयोः करणत्वा योगात् भर्तृभेनादेन विकल्पायोगाच्च क्रियमाणानु श्रदितं। न स्यत्र तप्येतिबोध[illegible] वर्जनात् करणत्वमेवातेनावृत्तिरेव युक्ता। एवं निसे पियत्तुसं यद्गनाश्रापठं [illegible]। पित्रो [illegible] यादे संप्राप्ते यः कु[illegible] तर्पणं आसुरं तद्भवेच्छ्रद्धं तत्तो यं रुधिरं भवेत्। सवेद्यातर्पणं कुर्यात् [illegible] तानैव कर्त्तव्यं कृतं च नि:फलं भवेत् दिति [illegible] सति तिल विषयं। यच्च पठंति। [illegible]॥ मन्वा [illegible] संक्रमणेषु च।

[illegible] काल [illegible] र्थीमिति मधातिथि हरदत्तो। मनुरपि। नात्रिवर्षस्य कर्त्तव्या बांधवै रुदकक्रिया। जातदंत स्यवा कुर्युर्नाम्नि वापि कृते सतीति। उदकं दाहोपलक्षणं। दंतोत्पत्त्यनंतरं प्राक्त्रिव र्षातान्मृते अहः। दंत जाते प्यकृत चूडे त्वहोरात्रेण शुद्धिरिति विज्ञानेश्वरोक्तेः। त्रिवर्षोर्ध्वं कृत चूडे अकृत चूडेवा प्रागुपनयनात् त्र्यहः। यत्तु प्यकृत चूडेवै जातदंत स्तु संस्थितः। तथापि दाहयित्वेनमाशौचं त्र्यहमाचरेदित्यंगिरसोक्तेः॥ अत्र जातदं तत्वमुद्देश्य पे विशेषणत्वाद विवक्षितं। दाहयित्वेत्य प्यनुवादः। उभयविधौ वाक्यभेदात्। त्रिवर्षात् प्राक् चूडाभावेग्नि दाने त्र्यहः स्यादभावे विघ्न क्तेरेकाह इति माधवः। प्रथम वर्षादौ कृत चूडस्य सदा त्र्यहः॥ निस्त्त चूडानां तु त्रिरात्रो शुद्धिरि ष्यते इति मनूक्तेः। एतत्सर्वं प्रागुक्तं सपिंडानां। मातापित्रो स्तु दशाहोर्ध्वं मृते सर्वत्र त्रिरात्रं। बालानामजातदंतानां त्रि रात्रेण शुद्धिरिति कश्यपोक्तेः॥ बेजिकादभिसंबंधादनुरुंध्यादघं त्र्यहमिति मनूक्तेश्च। शुद्धितत्वादयोगौडास्तु। अजा तदंत मरणे तु पित्रोरेकाहमुष्यते। दंतजाते त्रिरात्रं स्याद्यदिस्यातां तु निर्गुणौ इति कौमीत्। काश्यपं श्लहपरं। अन्य ग

श्री

जताञ्चितं। तदभावे निषिंचेत्तु दर्भमंत्रेण वा पुनः॥ पतितस्य तिलोदकं वर्ज्यमेव॥ अथ वृद्धिश्राद्ध निमित्तं तर्पणीयं
प्रोर्दयेत्राख्ले। जन्मन्यथोपनयने विवाहे पुत्रकस्य चापि चूडाकर्मादौ मुखान्नामतर्पये द्विधिपूर्वकं वेदव्रतेषु चाधाने च
त्रेपुंसवृद्धेषु चान्नप्राशने जातकर्मनामकरणयोः प्रथमार्त्तवे। देवारामतडागादिप्रतिष्ठासु समस्तेषु च राजाभिषेके वा
यात्रायोजने वृद्धिसंज्ञकान्। वनस्पत्याश्रमप्रवेशगृहप्रवेशन पूर्वेद्युः सप्त एव वा। पितृन् देवर्षिविधिना तर्पयेत् कर्मसि
द्धये। आदिपदात् सीमंतोन्नयनः। विष्णुपुराणे। यज्ञोद्वाहप्रतिष्ठासु मेखलाबंधमोक्षणे पुत्रजन्मवृषोत्सर्गे वृद्धिश्राद्धस
माचरेत्। तत्रैव नामकर्मणि बालानां चूडाकर्मादिके तथा सीमंतोन्नयने चैव पुत्रादिमुखदर्शने। नवयोनिश्राद्धमिति मेधातिथिः। तत्रा
पूर्वोक्तविरोधात्। सुतोत्पत्तौ तथा श्राद्धमन्नप्राशनिके तथा पतिराजमार्त्तंडाद्यायत्तु वृद्धदोगपरिशिष्टं। सर्वेषु दोः कर्म
